नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 25

No. of Printed Pages — 7

# SS—12—Sanskrit Sah. (Supp.)

# उच्च माध्यमिक पूरक परीक्षा, 2013
# SENIOR SECONDARY SUPPLEMENTARY EXAMINATION, 2013

# संस्कृत साहित्यम्

समय : $3\frac{1}{4}$ ( सपाद होरात्रयम् )

पूर्णाङ्कः 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यत: लेख्य: ।

(2) सर्वे प्रश्ना: अनिवार्या: ।

(3) प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

## खण्ड - क

1. अधोलिखितम् अपठितगद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत —

परेषां प्राणिनामुपकार: परोपकारोऽस्ति । परस्य हितसाधनं मनसा वाचा कर्मणा चान्येषां हितानुष्ठानमेव परोपकारशब्देन गृह्यते । संसारे परोपकार: एव स गुणो विद्यते, येन मनुष्येषु सुखस्य प्रतिष्ठा वर्तते । परोपकारेण हृदयं पवित्रं सरसं सदयं च भवति । सत्पुरुषा: कदापि स्वार्थ- तत्परा: न भवन्ति । ते परेषां दु:खं स्वीयं दु:खं मत्वा तन्नाशाय यतन्ते ।

(i) केन हृदयं पवित्रं भवति ? ( एकपदेन उत्तरम् ) 1

(ii) के स्वार्थतत्परा: न भवति ? ( पूर्णवाक्येन उत्तरम् ) 1

(iii) "............. परेषां दु:खं स्वीयं दु:खं मत्वा तन्नाशाय यतन्ते ।" इत्यत्र 'यतन्ते' इति क्रियाया: कर्तृपदं किम् ? 1

2. निम्नलिखितम् अपठितगद्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत —

पुण्येऽस्मिन् भारतवर्षे प्राचीनकालादेव अहिंसाया: महत्त्वं मन्यते । भगवान् बुद्ध:, भगवान् महावीर:, सम्राट् अशोक:, अहिंसाया: शान्तेश्च उपदेश ददौ । तेषामेव अनुयायी श्रीमान् महात्मागांधी-महाभाग: अपि स्वजीवने अहिंसाया: व्रतं स्वीकृतवान् । तस्य मतमासीत् यत् तया दुष्कराणि अपि कार्याणि सुकराणि भवन्ति ।

धर्मप्रधानं खलु अस्माकं भारतम्, बहूनि खलु लक्षणानि अंगानि च धर्मस्य किन्तु सर्वाणि शास्त्राणि सर्वे च महापुरुषा: ऋषय: मुनयश्च अहिंसारूपं धर्ममुत्कृष्टं मन्यन्ते । अत एव भारतीयधर्मस्य संस्कृते: सभ्यतायाश्च स्रोत: वेद एवास्ति । स च वेद-भगवान् उपदिशति 'मा हिंस्यात् सर्वभूतानि' वैदिकधर्मस्य बौद्धजैनधर्मयो: च मूलमहिंसा एव विद्यते ।

(i) अहिंसाया: शान्तेश्च उपदेश: केन दत्त: ? ( एकपदेन उत्तरम् ) $\frac{1}{2}$

(ii) भारतीय धर्मस्य संस्कृते: स्रोत: कोऽस्ति ? ( एकपदेन उत्तरम् ) $\frac{1}{2}$

(iii) क: स्वजीवने अहिंसाया: व्रतं स्वीकृतवान् ? ( पूर्णवाक्येन उत्तरम् ) 2

(iv) "वैदिक धर्मस्य मूलम् अहिंसा एव विद्यते' इत्यस्मिन् वाक्ये 'विद्यते' क्रियापदस्य कर्तृपदं लिखत । 1

(v) ''तस्य मतमासीत् यत् तया दुष्कराणि अपि कार्याणि सुकराणि भवन्ति ।'' इत्यस्मिन् वाक्ये 'तया' इति सर्वनामपदं कस्य संज्ञापदस्य स्थाने प्रयुक्तमस्ति ? 1

(vi) 'प्रतिज्ञा' इत्यस्य, पर्यायपदं गद्यांशात् लिखत । 1

(vii) 'दुष्करकार्याणि' इत्यत्र विशेषणपदं किम् ? 1

(viii) गद्यांशस्य समुचितं शीर्षकं लिखत । 2

**खण्ड - ख**

3. प्रदत्तरूपरेखया कथासंयोजनं कुरुत — 8

एक: काक: ................ एकम् उद्यानम् .................. पिपासित: .............. जलं नास्ति ........................ एक: घट: ..................... घटे जलम् अल्पम् ....................... काक: शिलाखण्डान् ...................... क्षिपति .................... जलम् उपरि ...................... जलं पिबति ..................... गच्छति ।

**अथवा**

क्रमरहितानि वाक्यानि समुचितक्रमानुसारं लिखत —

(i) वृद्ध: नदीं प्रविष्ट: ।

(ii) जना: पुराणकथां श्रृण्वन्ति ।

(iii) राजा विक्रम: पर्यटनं करोति ।

(iv) कोऽपि वृद्धस्य प्राणरक्षां न करोति ।

(v) वृद्ध: आशिषं दत्त्वा निजस्थानं गत: ।

(vi) विक्रम: नगरं प्राप्नोति ।

(vii) विक्रम: वृद्धं पत्न्या सह तटम् आनीतवान् ।

(viii) विक्रमोऽपि पुराणकथां श्रृणोति ।

(ix) वृद्ध: नागरिकान् आकारितवान् ।

4. प्रदत्तसंकेतानुसारं वर्णनं लिखत — ( 80 शब्दाः ) 4

वर्षाकालः, गगने, मेघाः, सौदामिन्यः, सर्वत्र जलं, मार्गाः पङ्कमयाः, मण्डूकाः रटन्ति, मयूराः नृत्यन्ति, वृक्षाः पल्लविताः, क्षेत्राणि जलपूर्णानि, कृषकाः बीजवपनं, जलाशयाः जलपूर्णाः, वृष्टिः, जीवनम् ।

**अथवा**

शिक्षायाः महत्त्वं, कर्त्तव्याकर्तव्ययोः विवेकः, स्त्रीशिक्षायाः, उपयोगिता, शिक्षिताः स्त्रियः, बालकान् पाठयितुं समर्थाः, माता, प्रथमः, गुरुः गृहप्रबन्धे दक्षाः, समाजपरिवारयोः उन्नत्यै, स्त्रीशिक्षायाः, महत्ता ।

**खण्ड - ग**

5. अधोलिखितं गद्यांशं सम्पठ्य प्रश्नानामुत्तराणि लिखत —

अतएव कस्मिन्नपि समये कार्यसाधकत्वेऽपि लोका अस्माद् वित्रस्यन्त्येव । वैरिणां भारावताराय कदाचित् हिताधारापि करवालधारा क्रूराकारा प्रखरप्रकारा एव प्रसिद्धा लोकेषु । विगुणः कार्षापणः, कुत्सितश्च पुत्रः संकटे कदाचिदुपयुक्तो भवेत् परन्तु जनसमाजे द्वयोरुपर्येव नासा-भ्रूसंकोचो जातो जनिष्यते च ।

(i) लोकाः कस्मिन्नपि समये कस्मात् वित्रस्यन्ति ? ( एकपदेन उत्तरम् ) 1

(ii) वैरिणां भारावताराय लोकेषु का प्रसिद्धा अस्ति ? ( पूर्णवाक्येन उत्तरम् ) 1

(iii) 'विगुणः कार्षापणः' इत्यनयोः विशेषणं किम् ? 1

(iv) ''कुत्सितश्च ................. संकटे कदाचिदुपयुक्तो भवेत्'' इत्यत्र 'भवेत्' इति क्रियायाः कर्तृपदेन अन्वितिः कुरुत । 1

6. अधोनिर्दिष्टं पद्यं पठित्वा प्रश्नानामुत्तराणि लिखत —

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥

(i) कर्मणाम् अनारम्भात् पुरुषः किं नाश्नुते ? ( एकपदेन उत्तरम् ) 1

(ii) कस्मादेव पुरुषः सिद्धिं नाधिगच्छति ? ( पूर्णवाक्येन उत्तरम् ) 1

(iii) ............... नैष्कर्म्यं न अश्नुते ।' उचितपदेन अन्वितिं कुरुत । 1

(iv) 'सफलता' इति पदस्य अत्र कः पर्यायः ? 1

7. निम्नांकितं नाट्यांशं सम्पठ्य निर्दिष्ट प्रश्नानामुत्तराणि लिखत —

लव: — ( प्रविश्य, स्वगतम् ) अविज्ञातवय: क्रमौचित्यात् पूज्यानपि सत: कथमभिवादयिष्ये ? ( विचिन्त्य ) अयं पुनरविरुद्धप्रकार: इति वृद्धेभ्य: श्रूयते । ( सविनयमुपसृत्य ) एष वो लवस्य शिरसा प्रणामपर्याय: ।

अरुन्धतीजनकौ: — कल्याणिन् ! आयुष्मान् भूया: ।

कौशल्या : — जात ! चिरं जीव ।

अरुन्धती: — एहि वत्स ! ( लवमुत्सङ्गे गृहीत्वा आत्मगतम् ) दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथोऽपि मे पूरित: ।

(i) अरुन्धती कम् उत्सङ्गे गृह्णाति ? ( एकपदेन उत्तरम् ) 1

(ii) लव: स्वमनसि किं विचारयति ? ( पूर्णवाक्येन उत्तरम् ) 1

(iii) 'अविज्ञातवय:' इति विशेषणस्य अत्र विशेष्यम् किम् ? 1

(iv) 'जाता' इति पदस्य अत्र किं विलोमपदम् ? 1

8. निम्नलिखितयो: शब्दयो: हिन्दीभाषायां आङ्लभाषायां वा अर्थं लिखत — 1 + 1 = 2

(i) सकाशात्

(ii) वात्यया ।

9. रेखांकित पदानि आधृत्य प्रश्ननिर्माणं कुरुत — 1 + 1 + 1 + 1 = 4

(i) <u>चातक:</u> शरद्घनं न याचते ।

(ii) <u>लक्ष्म्या</u> परिगृहीता: राजान: विक्लवा: भवन्ति ।

(iii) षोडशवर्षदेशीयो गौरो युवा <u>हयेन</u> पर्वतश्रेणीरुपर्युपरि गच्छति ।

(iv) गुणलुब्धा: सम्पद: स्वयमेव <u>विमृश्यकारिणं</u> वृणते ।

10. निम्नांकितवाक्ययो: भावार्थ: हिन्दीभाषायाम् , आङ्लभाषायां संस्कृते वा लेख्य: — 2 + 2 = 4

(i) त्वया निर्मितोऽयम् अनाथाश्रमोऽधुना महाद्रुमेण परिणत: ।

(ii) उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।

11. अधोलिखितस्य श्लोकस्य अन्वयं लिखत — 2

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥

12. निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत —

(i) 'उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ।' इत्यत्र कर्तृक्रियापदयोः चयनं कुरुत । 1 + 1 = 2

(ii) 'चन्द्रापीडः प्रीतहृदयः स्वभवनमाजगाम ।' इत्यत्र विशेषणपदं किं वर्तते ? 1

(iii) '<u>स</u> स्वल्पभाषी, अतस्तस्य मनः कथा मनोव्यथा वा बोधगम्या नास्ति ।' इत्यत्र रेखांकितपदस्य स्थाने संज्ञापदस्य प्रयोगं कृत्वा वाक्यं पुनः लिखत । 1

(iv) 'तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि ।' इत्यत्र सर्वनामपदस्य चयनं कुरुत । 1

(v) '<u>अथा</u>कस्मात् परितो मेघमाला पर्वतश्रेणीव प्रादुरभूत्' इत्यत्र रेखाङ्कितपदस्य पर्यायबोधकं पदं लिखत । 1

(vi) 'इन्दुर्द्विलक्षे कुमुदस्य बन्धुर्यो यस्य <u>मित्रं</u> न हि तस्य दूरम्' इत्यत्र रेखांकितपदस्य विलोमार्थकं पदं लिखत । 1

(vii) 'महाराज ! नववार्षिकी मे कन्या ।' इत्येतत् वाक्यं कः कस्मै कथयति ? 1

13. महाकविना भारविणा किं महाकाव्यं रचितम् ? 1

14. महाभारतस्य रचना कति चरणेषु जाता ? नामानि लिखत । 2

15. गद्यपद्यमयं काव्यं किं नाम्ना कथ्यते ? 1

16. ऋग्वेदे कति मण्डलानि सन्ति ? 1

17. काव्येषु किं रम्यम् अस्ति ? 1

18. संस्कृतसाहित्ये राजनीति प्रधानं नाटकं किमस्ति ? 1

19. साहित्यिकगद्यस्य आद्यः ग्रन्थः कोऽस्ति ? 1

## खण्ड - घ

20. (i) 'य:' इति पदे स्वर: लघु: गुरु: वा ? 1

(ii) 'त्वमेव' इति पदे क: गण: ? 1

21. अधोलिखितेषु कयोश्चिद् **द्वयो:** लक्षणोदाहरणं लिखत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

(i) अनुष्टुप्

(ii) शिखरिणी

(iii) मालिनी

(iv) वसन्ततिलका ।

22. अधोलिखितपंक्तिषु छन्दस: नामोल्लेखं कुरुत — 1 + 1 + 1 = 3

(i) साहित्यसङ्गीतकलाविहीन: । मनुष्यरूपेण मृगाश्चरन्ति ।

(ii) केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला: ।

(iii) दीर्घग्रीव: स भवति, खुरास्तस्य चत्वार एव ।

23. उपमानोपमेययो: भेदे सति साम्यं कस्मिन् अलङ्कारे भवति ? तस्य लक्षणमपि लिखत । 1 + 1 = 2

24. अधोलिखितयो: कयोश्चिद् **द्वयो:** अलंकारयो: लक्षणोदाहरणं लिखत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

(i) श्लेष:

(ii) उत्प्रेक्षा

(iii) अनुप्रास: ।

25. अधोलिखितेषु पद्यांशेषु अलङ्कारस्य नामोल्लेखं कुरुत — 1 + 1 + 1 = 3

(i) नवपलाशपलाशवनं पुर: ।

(ii) काव्यामृतरसास्वाद: सङ्गम: सज्जनै: सह ।

(iii) बृहत्सहाय: कार्यान्तं क्षोदीयानपि गच्छति ।

सम्भूयाम्बोधिमभ्येति महानद्या नगापगा: ॥